# Brahmakritam 07 Shiva Stotram

# બ્રહ્મકૃતં ૭ શિવસ્તોત્રમ્

## Document Information

Text title : Brahmakritam 07 Shiva Stotram

File name : brahmakRRitaM07shivastotram.itx

Category : shiva, skandapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : skandapurANa | kAshIkhaNDa | uttarakhaNDa | adhyAya 73/101-140||

Latest update : June 24, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 24, 2025

*sanskritdocuments.org*

# બ્રહ્મકૃતં ૭ શિવસ્તોત્રમ્

બ્રહ્મોવાચ ।
(બુધેશ્વર લિઙ્ગ, ઓઙ્કારેશ્વર લિઙ્ગ)
નમ ઓઙ્કારરૂપાય નમોઽક્ષરવપુર્ધૃતે ।
નમોઽકારાદિવર્ણાનાં પ્રભવાય સદાશિવ ॥ ૧૦૧॥

અકારસ્ત્વમુકારસ્ત્વં મકારસ્ત્વમનાકૃતે ।
ઋગ્યજુઃ સામરૂપાય રૂપાતીતાય તે નમઃ ॥ ૧૦૨॥

નમો નાદાત્મને તુભ્યં નમો બિન્દુકલાત્મને ।
અલિઙ્ગલિઙ્ગરૂપાય સર્વરૂપસ્વરૂપિણે ॥ ૧૦૩॥

નમસ્તે ધામનિધયે નિધનાદિવિવર્જિત ।
નમો ભવાય રુદ્રાય શર્વાય ચ નમોઽસ્તુતે ॥ ૧૦૪॥

નમ ઉગ્રાય ભીમાય પશૂનાં પતયે નમઃ ।
નમસ્તારસ્વરૂપાય સમ્ભવાય નમોઽસ્તુ તે ॥ ૧૦૫॥

અમાયાય નમસ્તુભ્યં નમઃ શિવતરાય તે ।
કપર્દિને નમસ્તુભ્યં શિતિકણ્ઠ નમોઽસ્તુ તે ॥ ૧૦૬॥

મીઢુષ્ટમાય ગિરિશ શિપિવિષ્ટાય તે નમઃ ।
નમોઽહ્રસ્વાય ખર્વાય બૃહતે વૃદ્ધરૂપિણે ॥ ૧૦૭॥

કુમારગુરવે તુભ્યં કુમારવપુષે નમઃ ।
નમઃ શ્વેતાય કૃષ્ણાય પીતાયારુણમૂર્તયે ॥ ૧૦૮॥

ધૂમ્રવર્ણાય પિઙ્ગાય નમઃ કિર્મીરવર્ચસે ।
નમઃ પાટલવર્ણાય નમો હરિતતેજસે ॥ ૧૦૯॥

નાનાવર્ણસ્વરૂપાય વર્ણાનાં પતયે નમઃ ।
નમસ્તે સ્વરરૂપાય નમો વ્યઞ્જનરૂપિણે ॥ ૨.૭૩.૧૧૦॥

ઉદાત્તાયાનુદાત્તાય સ્વરિતાય નમો નમઃ ।
હ્રસ્વદીર્ઘપ્લુતેશાય સવિસર્ગાય તે નમઃ ॥ ૧૧૧॥

અનુસ્વારસ્વરૂપાય નમસ્તે સાનુનાસિક ।
નમો નિરનુનાસાય દન્ત્યતાલવ્યરૂપિણે ॥ ૧૧૨॥

ઓષ્ઠ્યોરસ્યસ્વરૂપાય નમ ઊષ્મસ્વરૂપિણે ।
અન્તસ્થાય નમસ્તુભ્યં પઞ્ચમાય પિનાકિને ॥ ૧૧૩॥

નિષાદાય નમસ્તુભ્યં નિષાદપતયે નમઃ ।
વીણાવેણુમૃદઙ્ગાદિ વાદ્યરૂપાય તે નમઃ ॥ ૧૧૪॥

નમસ્તારાય મન્દ્રાય ઘોરાયાઘોરમૂર્તયે ।
નમસ્તાનસ્વરૂપાય મૂર્ચ્છનાપતયે નમઃ ॥ ૧૧૫॥

સ્થાયિસઞ્ચારિભેદેન નમો ભાવસ્વરૂપિણે ।
તાલપ્રિયાય તાલાય લાસ્યતાણ્ડવજન્મને ॥ ૧૧૬॥

તૌર્યત્રિકસ્વરૂપાય તૌર્યત્રિકમહાપ્રિય ।
તૌર્યત્રિકકૃતાં ભક્ત્યા નિર્વાણશ્રીપ્રદાયક ॥ ૧૧૭॥

સ્થૂલસૂક્ષ્મસ્વરૂપાય દૃશ્યાદૃશ્યસ્વરૂપિણે ।
અર્વાચીનાય ચ નમઃ પરાચીનાય તે નમઃ ॥ ૧૧૮॥

વાક્પ્રપઞ્ચસ્વરૂપાય વાક્પ્રપઞ્ચપરાય ચ ।
એકાયાનેકભેદાય સદસત્પતયે નમઃ ॥ ૧૧૯॥

શબ્દબ્રહ્મ નમસ્તુભ્યં પરબ્રહ્મ નમોઽસ્તુતે ।
નમો વેદાન્તવેદ્યાય વેદાનાં પતયે નમઃ ॥ ૨.૭૩.૧૨૦॥

નમો વેદસ્વરૂપાય વેદગોચરમૂર્તયે ।
પાર્વતીશ નમસ્તુભ્યં જગદીશ નમોઽસ્તુ તે ॥ ૧૨૧॥

નમસ્તે દેવદેવેશ દેવ દિવ્યપદપ્રદ ।
શઙ્કરાય નમસ્તુભ્યં નમસ્તુભ્યં મહેશ્વર ॥ ૧૨૨॥

નમસ્તે જગદાનન્દ નમસ્તે શશિશેખર ।
મૃત્યુઞ્જય નમસ્તુભ્યં નમસ્તે ત્ર્યમ્બકાય ચ ॥ ૧૨૩॥

નમઃ પિનાકહસ્તાય ત્રિશૂલાયુધધારિણે ।
નમસ્ત્રિપુરહન્ત્રે ચ નમોઽન્ધક નિષૂદન ॥ ૧૨૪॥

કન્દર્પદર્પદલન નમો જાલન્ધરારયે ।
કાલાય કાલકાલાય કાલકૂટવિષાદિને ॥ ૧૨૫॥

વિષાદહન્ત્રે ભક્તાનામભક્તૈકવિષાદદ ।
જ્ઞાનાય જ્ઞાનરૂપાય સર્વજ્ઞાય નમોઽસ્તુતે ॥ ૧૨૬॥

યોગસિદ્ધિપ્રદોઽસિ ત્વં યોગિનાં યોગસત્તમ ।
તપસાં ફલદોઽસિ ત્વં તપસ્વિભ્યસ્તપોધન ॥ ૧૨૭॥

ત્વમેવ મન્ત્રરૂપોઽસિ મન્ત્રાણાં ફલદો ભવાન્ ।
મહાદાનફલં ત્વં વૈ મહાદાનપ્રદો ભવાન્ ॥ ૧૨૬॥

મહાયજ્ઞસ્ત્વમેવેશ મહાયજ્ઞફલપ્રદ ।
ત્વં સર્વઃ સર્વગસ્ત્વં વૈ સર્વદઃ સર્વદૃગ્ભવાન્ ॥ ૧૨૯॥

સર્વભુક્સર્વકર્તા ત્વં સર્વસંહારકારક ।
યોગિનાં હૃદયાકાશ કૃતાલય નમોઽસ્તુ તે ॥ ૨.૭૩.૧૩૦॥

ત્વમેવ વિષ્ણુરૂપેણ શઙ્ખચક્રગદાધરઃ ।
ત્રિલોકીં ત્રાયસે ત્રાતઃ સત્ત્વમૂર્તે નમોઽસ્તુ તે ॥ ૧૩૧॥

ત્વમેવ વિદધાસ્યેતદ્વિધિર્ભૂત્વા વિધાનવિત્ ।
રજોરૂપં સમાલમ્બ્ય નીરજસ્કપદપ્રદ ॥ ૧૩૨॥

ત્વમેવ હિ મહારુદ્રસ્ત્વં મહોગ્રો ભુજઙ્ગભૃત્ ।
ત્વમેવ હિ મહાભીમો મહાપિતૃવનેચર ॥ ૧૩૩॥

તામસીં તનુમાશ્રિત્ય ત્વં કૃતાન્ત કૃતાન્તક ।
કાલાગ્નિરુદ્રો ભૂત્વાન્તે ત્વં સંવર્તપ્રવર્તકઃ ॥ ૧૩૪॥

ત્વં પુમ્પ્રકૃતિરૂપાભ્યાં મહદાદ્યખિલં જગત્ ।
અક્ષિપક્ષ્મસમુત્ક્ષેપાત્પુનરાવિઃકરોષ્યજ ॥ ૧૩૫॥

ઉન્મેષવિનિમેષૌ તે સર્ગાસર્ગૈકકારણમ્ ।
કપાલમાલાખેલોઽયં ભવતઃ સ્વૈરચારિણઃ ॥ ૧૩૬॥

ત્વત્કણ્ઠે નૃકરોટીયં ધૂર્જટે યા વિભાસતે ।
સર્વેષામન્તદગ્ધાનાં સા સ્ફુટં બીજમાલિકા ॥ ૧૩૭॥

ત્વત્તઃ સર્વમિદં શમ્ભો ત્વયિ સર્વં ચરાચરમ્ ।

કસ્ત્વાં સ્તોતું વિજાનાતિ પુરાં વાચામગોચરમ્ ॥ ૧૩૮॥

સ્તોતા ત્વં હિ સ્તુતિસ્ત્વં હિ નિત્યં સ્તુત્યસ્ત્વમેવ ચ ।
વેદ્મ્યોં નમઃ શિવાયેતિ નાન્યદ્વેઽદ્મ્યેવ કિઞ્ચન ॥ ૧૩૯॥

ત્વમેવ હિ શરણ્યં મે ત્વમેવ હિ ગતિઃ પરા ।
ત્વામેવ પ્રણમામીશ નમસ્તુભ્યં નમો નમઃ ॥ ૨.૭૩.૧૪૦॥

ઇતિ શ્રીસ્કાદપુરાણે કાશીખણ્ડે પૂર્વાર્દ્ધે ત્રિસપ્તતિતમા- ધ્યાયાન્તર્ગતં
બ્રહ્મકૃતં શિવસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । કાશીખણ્ડ । ઉત્તરખણ્ડ । અધ્યાય ૭૩/૧૦૧-૧૪૦॥

skandapurANa . kAshIkhaNDa . uttarakhaNDa . adhyAya 73/101-140..

Proofread by PSA Easwaran

---

*Brahmakritam 07 Shiva Stotram*

pdf was typeset on June 24, 2025

Please send corrections to *sanskrit@cheerful.com*